Vol 8, Issue 11, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.11.8935

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

# अग्निपुराणे वर्णिताः सन्धिनियमाः : पाणिनीयदृष्ट्या परीक्षणम्

**Arpita Banik [1], Dr. Vikash Arya [2]**

[1, 2] Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

**सूचीमुखशब्दाः - संक्षिप्तसारः, अवतरणिका, संस्कृतव्याकरणसाहित्ये सन्धिनियमाः, अग्निपुराणे वर्णिताः सन्धिनियमाः पाणिनीयदृष्ट्या तत्परीक्षणञ्च, उपसंहारः, शब्दसंक्षेपः, ग्रन्थविवरणपञ्जी**

**संक्षिप्तसारः -** विश्वस्य प्राचीनातमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा । भाषायामस्यामेव एकशतमध्वर्युशाखा, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽथर्वाणो वेद इति महाभाष्योक्ताभिः[1]1131 शाखाभिः समन्विताः ऋग्यजुः सामाथर्वाणो वेदाः शिक्षाकल्पनिरुक्तछन्दोज्योतिर्व्याकरणाख्यैः षड्भिः वेदाङ्गैस्समेधिता विराजन्तेतराम् । एतेषां प्रतिवेदानां अर्थावगमनाय षड्वेदाङ्गानि तथा षडङ्गानि सन्ति । तेषु षडङ्गेषु व्याकरणमेव वेदपुरुषस्य मुखरूपेण कल्प्यते । तदुच्यते **... *मुखं व्याकरणं स्मृतम्*** [2] इति । स्कन्धमते ***व्याकरणं सारं सिद्धस्वरूपकम्***[3] इति । कात्यायनविबोधाय बालानां बोधाय च स्कन्धमहोदयः व्याकरणशास्त्रस्य सारं कथयितुमचिकीर्षत् । इह खल्वस्मिन् व्याकरणशास्त्रे प्रत्याहार-सन्धि-शब्दरूप-अव्य-कारक-समास-तिङ्-कृत्-इत्यादयः विविधविषयाः सुपरिवेशिताः सन्ति ।

साम्प्रतं व्याकरणसमन्वितस्य वेदाङ्गस्य प्रतिनिधिभूतमेकमेव व्याकरणमस्ति पाणिनीयं व्याकरणम् । महर्षिणा पाणिनिना अनुमानतः सहस्रचतुष्टयैः स्वल्पाक्षरसूत्रैः संस्कृतभाषायां नितान्तं वैज्ञानिकं व्याकरणं प्रस्तुतीकृत्य विदुषः आश्चर्ये निपातिताः । वैज्ञानिकदृष्ट्या देवभाषाया यथा मनोहरं शास्त्रीयं विवेचनं महर्षि-पाणिनिना कृतं तादृशं विवेचनमन्यत्र नोपलब्धमस्ति । यथा व्याकरणसाहित्ये *अष्टाध्यायी*, तथा अष्टादशमहापुराणेषु *अग्निपुराणं* तु एक एवान्यतमं महापुराणम् । तत्र विविधेषु वर्णितेषु विषयेषु व्याकरणशास्त्रं त्वेकमेव । व्याकरणशास्त्रेषु तत्र प्रत्याहार-लिङ्गत्रय-सन्धि-सुप्-तिङ्-कारक-समास-तद्धित-कृत्-उणादीनां विवरणमस्ति ।

इदानीम् आधार एव आधेयस्य आश्रयस्वरूपः । यदि आधार एव भिन्न स्यात्तर्हि आधेयोऽपि भिन्नो भवति इति साधारणो नियमः । आधारवैचित्र्ये सति आधेयवैचित्र्यं प्रतिफलितमिति निश्चितरूपेण वक्तुं युज्यते । प्रतिग्रन्थेषु विषयवर्णनं स्वाभाविकतया स्वकीयरीत्या स्वकीयपरम्परया च विहिता । विषयवर्णने तत्रातीव वैचित्र्यमस्तीति स्वाभाविक एव । व्याकरणगतेषु विविधेषु विषयेषु सन्धिमवलम्ब्य अष्टाध्यायी-अग्निपुराणयोः तुलनात्मकसमीक्षा एव गवेषणापत्रस्यास्य मुख्योद्देश इति ॥

[1] पस्पशा, दण्डस्वामी दामोदर आश्रम, पृष्ठा - 186

[2] पा.शि. – 41-42

[3] अग्नि. – 349.1

**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**अवतरणिका** –

***गीर्वाणवाणी जगति प्रसिद्धा, दिव्या सुबोधा सरलातिरम्या।***
***महाकवीनामखिलोत्तमा सा, सरस्वती भारतभूसुराणाम्॥***

विश्वस्य प्राचीनातमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा। वैदिकसाहित्यं लौकिकसाहित्यञ्च भाषया अनया सुग्रथितम्। साक्षात्कृतधर्मैर्भारतीयमणीषाभिः अध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः। *वेदोऽखिलो धर्ममूलम्*।[4] मन्त्रब्राह्मणात्मकः[5] सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते। इदमपि सत्यमतिरोहितमेवास्ति यच्छिक्षादि षडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव। संहिता-ब्राह्मण-आरण्यक-उपनिषद्-भेदेन वेदस्य चातुर्विध्यं प्रतिपादितमृषिभिः। पुनरपि संहिता एव ऋक्-साम-यजुः-अथर्वभेदेन चतुर्धा विभज्यते। प्रतिवेदानामेतेषां वेदाङ्गान्यपि सन्ति। वेदाङ्गानि तु षडेव – शिक्षा-कल्प-निरुक्त-व्याकरण-छन्दः-ज्योतिष-भेदैः। एतेषु व्याकरणमेव वेदपुरुषस्य मुखस्वरूपम्। तदुच्यते ***... मुखं व्याकरणं स्मृतम्***[6] इति। बहवो व्याकरणग्रन्थाः तत्र सन्ति। तद्यथा – अष्टाध्यायी, मुग्धबोधः, कातन्त्रः, चान्द्रः, सरस्वतीकण्ठाभरणम् इत्यादयः। तेषु व्याकरणग्रन्थेषु शब्दरूपाणि, धातुरूपाणि, सन्धिः, कारकः, समासः, कृत्प्रत्ययाः, तद्धितप्रत्यया इत्यादि विविधाः विषयाः स्व-स्व-रीत्या आलोचिता इति दरीदृश्यन्ते। एतेषु व्याकरणग्रन्थेषु महर्षिपाणिनिविरचितस्य *अष्टाध्यायी* इति ग्रन्थस्य रचनाकाल एव खीष्टपूर्व-षष्ठ-पञ्चम-शतकम्।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इति वेदानां समुपबृंहकत्वेन पुराणसाहित्यस्यापि वेदोपकारकत्वं वर्तते। श्रुतानीह पुराणानि सेतिहासानि चानघ इत्यादिवाक्यादितिहासस्यापि पुराणसहचरत्वेन वेदोपकारकत्वं सिद्धमेव। पुरा भव पुराणमिति विग्रहे पुराणशब्दो निष्पद्यते। अपि च, पुरा नवं भवति[7] इति पुराणम्। पुराणस्य अष्टादशत्वं प्रसिद्धं ब्राह्मं पाद्मं वैष्णवञ्चादिभेदेन[8]। पुराणेष्वमीषु अग्निपुराणं खलु अतीवप्रसिद्धमिति। अग्निपुराणस्य समयकाल एव नवमशतकम्। अष्टादशमहापुराणेषु अग्निपुराणेऽपि व्याकरणविषयेषु प्रत्याहार-सन्धि-कारक-समास-शब्दरूप-तिङ्-कृत्-इत्यादि विषये विस्तृतालोचना समुपलभ्यतेऽस्माभिः। तत्र खीष्टपूर्व-षष्ठ-पञ्चम-शतकस्थितेन महर्षिपाणिनिविरचितेन *अष्टाध्यायी*-इति ग्रन्थेन सह खीष्टीयनवमशतकस्य अग्निपुराणगतस्य व्याकरणविषयस्य तुलनात्मकसमीक्षा एव मनसि जायते। परन्तु लघुकलेवरेऽस्मिन् गवेषणापत्रे केवलमुभयोः ग्रन्थयोः सन्धिविषये तुलनात्मकसमीक्षा विहिता जातेति।

---

[4] मनु. - 2.6

[5] मन्त्रब्राह्मणयोर्वेदनामधेयम् (आपस्तम्ब-यज्ञपरिभाषासूत्रम् – 2.6.3)

[6] पा.शि. – 41-42

[7] नि.– 3.4.19.2

[8] *मद्वयं भद्वयञ्चैव बत्रयं वचतुष्टयम्। अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक्॥* (देवी. – 1.3.21) इति। अर्थात् – क) म-द्वयम् – मत्स्यपुराणम्, मार्कण्डेयपुराणम् ख) भ-द्वयम् – भविष्यपुराणम्, भागवतपुराणम् ग) ब-त्रयम् – ब्रह्मपुराणम्, ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम् घ) व-चतुष्टयम् – वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम् ङ) अ. – अग्निपुराणम् च) ना. – नारदपुराणम् छ) प. – पद्मपुराणम् ज) लिङ् – लिङ्गपुराणम् झ) ग.– गरुडपुराणम् ञ) कू.– कूर्मपुराणम् ट) स्क.– स्कन्दपुराणम् इति।

IJAMSR
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**संस्कृतव्याकरणसाहित्ये सन्धिनियमाः** –

अर्द्धमात्रोच्चारणकालेनाव्यवहितयोर्वर्णयोर्द्रुततरोच्चारणं सन्धिः । अत एव श्लोकार्द्धयोर्मन्त्रार्द्धयोर्वा न सन्धिः । तत्र अर्द्धमात्रोच्चारणकालव्यवधानस्योचितत्वादिति प्राञ्चः । सन्धे अपरं नाम एव संहिता ।

लौकिकव्याकरणे संहिता नाम सन्धिः । तदुच्यते – ***परः सन्निकर्षः संहिता*** [9] इति । आशयो यत् परशब्दोऽतिशये वर्तते । सन्निकर्षः प्रत्यासत्तिः । परो यः सन्निकर्षः, वर्णानाम् अर्धमात्राकालव्यवधानं, स संहितासंज्ञो भवति । यथा - विद्या आलयः – एतयोः द्वयोः वर्णयोः अतिशयद्रुतोच्चारणाय परस्परमेलने विद्यालयः एवं श्रुयते । एवं, दधि+अत्र = दध्यत्र । मधु+अत्र= मध्वत्र इत्यादि । सन्धेर्नियमविषये उच्यते –

***संहितैकपदे नित्या नित्या धातूपसर्गयोः ।***
***समासेऽपि च नित्या स्यात् सा चान्यत्र विभाषिता ॥*** इति ।

कारिकाया अस्या आशयो यत् संहितायां जातायां यद्यत्कार्यं भवति तदेवात्र कारिकायां संहिता-पदस्य लक्ष्यार्थः । लक्ष्यार्थोऽयं सन्धिं निर्दिश्यते । अयं तावत्तस्मात् कारिकायाः निर्गलितार्थः – **एकपदे, धातूपसर्गयोः समासे च सन्धि नित्यो, वाक्ये तु वक्तुरिच्छाधीनः** । उदाहरणानि -

**एकपदे** यथा – मुह्+क्त = मुह्+त= मुढ्+त=मुढ्+त=मुढ्+ढ=मूढ, पो+अन=पवनः इत्यादि । **धातूपसर्गयोः** यथा – उप-पद्+लङ् +त = उपापद्यत, प्राविशत् (प्र अविशत्) इयादि । **समासे** यथा – पीताम्बरम् (पीतम् अम्बरं यस्य स, पीतम्+अम्बरम्), पञ्चाननः (पञ्च आननः यस्य स, पञ्च+आननः) इत्यादि । एकपदादित्रये सन्धिर्नित्य इति उदाहरणे दर्शितम् । **वाक्ये तु स वक्तुरच्छाधीनः**, यथा – एकदा सः सचिवानाहूय प्रोवाच इति वा एकदा स सचिवान् आहूय प्रोवाच इति वा वक्ता यथेच्छं वक्तुमीष्टे । अपि च , रामो ग्रामं गच्छति अथवा रामः ग्रामं गच्छति इत्यादि ।

अष्टादशपटलात्मकस्य ऋग्वेदप्रातिशाख्यस्य *संहितापटलम्*– नामके द्वितीये पटले सन्धिविषयकाः आलोचना समुपलभ्यते अस्माभिः । सूत्रं तत्रास्ति ***संहितापदप्रकृतिः*** [10] इति । तद्भाष्ये उवटाचार्येणोक्तम् – *संहिता पदप्रकृतिः इत्येतदधिकृतं वेदितव्यम् आ सीमापटलात्* इति । ऋकप्रातिशाख्यस्य द्वादशपटलस्य नाम सीमापटलम् । अतएव द्वादशपटलात् प्राक् अर्थात् क्रम-हेतु-पटलम् – नामकमेकादशपटलं पर्यन्तं *संहितापदप्रकृतिः* इति सूत्रस्याधिकारो भवति । प्रातिशाख्येऽस्मिन् संहिता-नाम संहितापाठे पदसंयुक्तिः, य एव सन्धेरेव नामान्तरम् । सूत्रस्थितेन पद-शब्देन पदपाठे व्यवहृतानि पदान्येव अवगम्यते । उच्यते *पदमेव प्रकृतिः यस्याः सा संहिता* इति । सा संहिता प्रातिशाख्येऽस्मिन् विकार एव भवति । तर्हि उच्यते भाष्यकारेण – *पदानि प्रकृतिभूतानि यस्याः संहितायाः सा पदप्रकृतिः संहितात्र विकारः* इति । पदान्तान् पदादिभिः सन्दधेति यत्सा कालाव्यवायेन इति सूत्रेण संहितास्वरूपं विवृतम् । पदान्येव संहितायाः प्रकृतिभूतानि । पदान्तान् पदादिभिः सह यत् सन्दधदेति एकीकूर्वति, ग्रन्थमनुसरति सा एव संहिता इत्युच्यते । संहिता खलु द्विविधा – आर्षीसंहिता क्रमसंहिता च । आर्षी यथा – *अयं देवाय जन्मने* इति । क्रमसंहिता यथा – *पर्जन्याय प्र । प्र गायत । गायत दिवः* इति ।

[9] पा. – 1.4.109
[10] ऋक्प्रा. – 2.1

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**अग्निपुराणे वर्णिताः सन्धिनियमाः पाणिनीयदृष्ट्या तत्परीक्षणञ्च -**

पूर्वमुक्तं यत् अष्टाध्यायी-ग्रन्थस्य समयकाल एव ख्रीष्टपूर्व-षष्ठ-पञ्चम-शतकम्, अग्निपुराणस्य च ख्रीष्टीयनवमशतकम्। अतएव कालिकपौर्वापर्येण पूर्वम् अष्टाध्यायी-ग्रन्थस्य, ततः अग्निपुराणस्य सन्धिनियमाः समुल्लिखिताः सन्ति। इदानीं –

**अष्टाध्याय्यां सन्धिः**

संस्कृतव्याकरणशास्त्रेषु सन्धेः संहितायाः वा **त्रिविधत्वं** सर्वत्रैव स्वीकृतम् । तद्यथा – **स्वरसन्धिः**, **व्यञ्जनसन्धिः**, **विसर्गसन्धिः** चेति।

**अष्टाध्याय्यां स्वरसन्धिः**

स्वरसन्धिर्नाम द्वयोः स्वरवर्णयोः मेलनम्। बहूभिः सूत्रैः (42) वार्त्तिकैश्च स्वरसन्धिः अष्टाध्याय्यां प्रतिपादितः । तेषु सूत्रेषु वार्तिकेषु च कतिपय एव – **अकः सवर्णे दीर्घः**,[11] **इको यणचि**,[12] **एचोऽयवायावः**,[13] **लोपो शाकल्यस्य**,[14] **आद् गुणः**,[15] **वृद्धिरेचि**,[16] **एत्येधत्यूठ्सु**,[17] **उपसर्गादृति धातौ**,[18] **एङि पररूपम्**,[19] **ओमाङोश्च**,[20] **एङः पदान्तादति**,[21] **सवर्त्र विभाषा गोः**,[22] **अवङ् स्फोटायनस्य**,[23] **इन्द्रे च**,[24] **छे च**,[25] **अक्षादूहिन्यामुपसंख्यानम्**,[26] **स्वादीरेरिणोः**,[27] **प्रादूहोढोढ्येषैष्येषु**,[28] **ऋते च तृतीयासमासे**,[29] **प्र-वत्सतर-कम्बल-वसनार्ण-दशानामृणे**,[30] **शकन्धादिषु पररूपं वाच्यम्**,[31] **ओत्वष्ठयोः समासे वा**,[32] **ऋति सवर्णे ऋ वा**,[33] **ऌति सवर्णे ऌ वा** [34] इत्यादि। ग्रन्थभयादेतेषु कतिपयानि सूत्राणि आलोच्यन्तेऽत्र।

---

[11] पा. – 6.1.101
[12] पा. – 6.1.77
[13] पा. – 6.1.78
[14] पा. – 8.3.19
[15] पा. – 6.1.87
[16] पा. – 6.1.88
[17] पा. – 6.1.89
[18] पा. – 6.1.91
[19] पा. – 6.1.94
[20] पा. – 6.1.95
[21] पा. – 6.1.109
[22] पा. – 6.1.122
[23] पा. – 6.1.123
[24] पा. – 6.1.124
[25] पा. – 6.1.73
[26] वा. - 3604
[27] वा. - 3606
[28] वा. - 3605
[29] वा. - 3607
[30] वा. – 3608-9
[31] वा. - 3632
[32] वा. - 3634
[33] वा. - 3640
[34] वा. - 3641

सन्धिविधायकानि सूत्राणि -

क) **अकः सवर्णे दीर्घः** (पा. 6.1.101) – सूत्रे अक्-प्रत्याहारस्य षष्ठ्यैकवचने अकः इति स्थितम्। अक् – अ इ उ ऋ ऌ वर्णाः। अकः सवर्णेऽचि परे पूर्वपरयोः दीर्घैकादेशः स्यात्। अच् – सर्वे स्वरवर्णाः, प्रत्याहारे उक्तम्। उदाहरणानि यथा – अद्य+अवधिः - अद्यावधिः, नर+आकृतिः - नराकृतिः, दैत्य+अरिः - **दैत्यारिः** (सिद्धान्तकौमुद्याम्), विष्णु+उदयः - **विष्णूदयः** (सिद्धान्तकौमुद्याम्), पितृ+ ऋणम् - पितॄणम् इत्यादि।

ख) **इको यणचि** (पा. 6.1.77) – इकः स्थाने यथाक्रमेण यणादेशो भवति अचि परतः संहितायां विषये। सूत्रे इक् – इ उ ऋ ऌ, यण् – य व र ल, अच् – सर्वे स्वरवर्णाः। यथा – दधि अत्र - दध्यत्र, अति आचारः - अत्याचारः, देवी आगता - देव्यागता, सु आगतम् - स्वागतम्, मधु इदम् - मध्विदम्, पितृ अनुमतिः - पित्रनुमतिः, ऌ आकृतिः - लाकृतिः इत्यादि।

ग) **एचोऽयवायावः** (पा. 6.1.78) – संहितायाम् एचः स्थाने अय्, अव्, आय्, आव् इत्येते आदेशाः यथासंङ्ख्यं भवन्ति अचि परतः। यथा – चे अनम् - चयनम्, लो अणम् - लवणम्, गै अति - गायति, पौ अकः - पावकः, गो आ - गवा, रै ए - राये, शे ए - शये इत्यादि।

घ) **लोपः शाकल्यस्य** (पा. 8.3.19) – शाकल्याचार्यस्य मते वकार-यकारयोः पदान्तयोः अवर्णपूर्वयोः लोपो भवति अशि परतः। यथा – मुने आगच्छ मुनयागच्छ, मुन आगच्छ। विभो एहि विभवेहि विभ एहि, रवौ अस्तमिते रवावस्तमिते रवा अस्तमिते, हरे एहि हर एहि हरयेहि (सिद्धान्तकौमुद्याम्), विष्णो इह विष्ण इह विष्णविह (सिद्धान्तकौमुद्याम्) इत्यादि।

ङ) **आद् गुणः** (पा. 6.1.87) – संहितायाम् अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। यथा – उप इन्द्रः **उपेन्द्रः**(सिद्धान्तकौमुद्याम्), गङ्गा उदकम् **गङ्गोदकम्** (सिद्धान्तकौमुद्याम्), रमा ईशः **रमेशः**(सिद्धान्तकौमुद्याम्), नील उत्पलम् नीलोत्पलम्, देव ऋषिः देवर्षिः, तव ऌकारः तवल्कारः इत्यादि।

च) **वृद्धिरेचि** (पा. 6.1.88) – संहितायाम् अवर्णात् परो य एच्, एचि च परतः यः पूर्वपरयोः स्थाने वृद्धिः एकादेशो भवति। सूत्रे एच् – ए ओ ऐ औ। यथा – कृष्ण एकत्वम् कृष्णैकत्वम् (सिद्धान्तकौमुद्याम्), गङ्गा औघः गङ्गौघः (सिद्धान्तकौमुद्याम्), देव ऐश्वर्यम् देवैश्वर्यम् (सिद्धान्तकौमुद्याम्), कृष्ण औत्कण्ठ्यम् कृष्णौत्कण्ठ्यम् (सिद्धान्तकौमुद्याम्), अद्य एव अद्यैव, मत ऐक्यम् मतैक्यम् इत्यादि।

छ) **एत्येधत्यूठ्सु** (पा. 6.1.89) – अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। यथा – उप एति उपैति(सिद्धान्तकौमुद्याम्), उप एधते उपैधते(सिद्धान्तकौमुद्याम्), प्रष्ठ ऊहः प्रष्ठौहः(सिद्धान्तकौमुद्याम्), प्र एति प्रैति इत्यादि।

ज) **उपसर्गादृति धातौ** (पा. 6.1.91) – संहितायाम् अवर्णान्तात् उपसर्गात् ऋकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति। यथा – उप ऋच्छति उपार्च्छति (सिद्धान्तकौमुद्याम्), आ ऋच्छति आर्च्छति (सिद्धान्तकौमुद्याम्), आ ऋतः आर्तः इत्यादि।

झ) **एङि पररूपम्** (पा. 6.1.94) – अवर्णान्तात् उपसर्गात् एङादौ धातौ परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति संहितायाम्। यथा – प्र एजते प्रेजते (सिद्धान्तकौमुद्याम्), उप ओषति उपोषति (सिद्धान्तकौमुद्याम्) इत्यादि।

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

सन्धिविधायकानि वार्त्तिकानि -

ञ) **अक्षादूहिन्यामुपसंख्यानम्** (वा. 3604) – अक्षशब्दादूहिनीशब्दे परे पूर्वपरयोरचोः वृद्धिरेकादेशः स्यात् । यथा – अक्ष ऊहिनी अक्षौहिणी (सिद्धान्तकौमुद्याम्) ।

ट) **स्वादीरेरिणोः** (वा. 3606) – स्वशब्दात् ईरशब्दे ईरिन्शब्दे च परे पूर्वपरयोरचोः बृद्धिरेकादेशः स्यात् । यथा – **स्व ईरः स्वैरः, स्व ईरी स्वैरी, स्व ईरिणी स्वैरिणी** (सिद्धान्तकौमुद्याम्) ।

ठ) **प्रादूहोढोढ्येषैष्येषु** (वा. 3605) – प्र इत्युपसर्गात् ऊह-ऊढ-ऊढि-एष-एष्य एतेषु पूर्वपरयोरचोर्वृद्धिरेकादेशः स्यात् । यथा – प्र ऊहः प्रौहः, प्र ऊढः प्रौढः (सिद्धान्तकौमुद्याम्) ।

ड) **ऋते च तृतीयासमासे** (वा. 3607) – तृतीयासमासे अकाराद् ऋतशब्दे परे पूर्वपरयोरचोर्वृद्धिः स्यात् । यथा – **सुखेन ऋतः सुख ऋतः सुखार्तः** (सिद्धान्तकौमुद्याम्) इति ।

ढ) **प्र-वत्सतर-कम्बल-वसनार्ण-दशानामृणे** (वा. 3608-9) – प्र-वत्सतर-कम्बल-वसन-दश-ऋण-एतेषाम् ऋणशब्दे परे पूर्वपरयोरचोर्वृद्धिरेकादेशः स्यात् । यथा – **प्र ऋणम् प्रार्णम्** (सिद्धान्तकौमुद्याम्), **वत्सतर ऋणम् वत्सतरार्णम्** (सिद्धान्तकौमुद्याम्), कम्बल ऋणम् कम्बलार्णम् (सिद्धान्तकौमुद्याम्), वसन ऋणम् वसनार्णम् (सिद्धान्तकौमुद्याम्), दश ऋणम् दशार्णम् (सिद्धान्तकौमुद्याम्), ऋण ऋणम् ऋणार्नम् (सिद्धान्तकौमुद्याम्) इत्यादि ।

ण) **शकन्धादिषु पररूपं वाच्यम्** (वा. 3632) – शकादिशब्दानां टेरचि परे टेश्च परस्याचश्च स्थाने पररूपमेकादेश इत्यर्थाल्लभ्यते । शक अन्धुः शकन्धुः (सिद्धान्तकौमुद्याम्), कर्क अन्धुः कर्कन्धुः (सिद्धान्तकौमुद्याम्), कुल अटा कुलटा (सिद्धान्तकौमुद्याम्) इत्यादि ।

**एवम्** अष्टाध्याय्यां स्वरसन्धिविषये बहूनि सूत्राणि वार्त्तिकानि च सन्ति । ग्रन्थभयात् कतिपयस्योल्लेखो विहितोऽत्र ।

## अष्टाध्याय्यां स्वरसन्धौ तथा अच्सन्धौ प्रकृतिभावः

स्वरसन्धिविधानादनन्तरम् *वैयाकरणसिद्धान्तकौमुदी*-ग्रन्थस्य **प्रकृतिभावः**-प्रकरणे प्रकृतिभावः समुपवर्णितः तत्रभवता ग्रन्थकारेण । प्रकृतिभावो नाम स्व-स्वरूपे विद्यमानता तथा विकारहीनता । ***प्रकृत्या स्वभावेनावस्थिताः स्युरित्यर्थः*** ।[35] तद्विधायकानि एकविंशति (21) सूत्राणि तत्र सन्ति । तेषु सूत्रेषु कतिपय एव – **प्लुतप्रगृह्या अचि नित्यम्**,[36] **ईदूदेद्-द्विवचनं प्रगृह्यम्**,[37] **अदसो मात्**,[38] **शे**,[39] **निपात एकाजनाङ्**,[40] **ओत्**,[41] **सम्बुद्धौ शाकल्यस्येतावनार्षे**,[42] **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च**,[43] **ऋत्यकः**,[44] इत्यादि ।

---

[35] बाल. (पा. 6.1.125 – प्लुतप्रगृह्या अचि नित्यम्)
[36] पा. – 6.1.125
[37] पा. – 1.1.11
[38] पा. – 1.1.12
[39] पा. – 1.1.13
[40] पा. – 1.1.14
[41] पा. - 1.1.15
[42] पा. – 1.1.16
[43] पा. – 6.1.127
[44] पा. – 6.1.128

IJAMSR
**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

क) **प्लुतप्रगृह्या अचि नित्यम्** (पा. 6.1.125) – अचि परे प्लुताः प्रगृह्याश्च प्रकृत्या स्वभावेनावस्थिताः स्युः । सन्धयो न भवन्तीति यावत् । प्लुतो यथा – **एहि कृष्ण३ अत्र** (सिद्धान्तकौमुद्याम्) इति । प्रगृह्यं यथा – **हरी एतौ** (सिद्धान्तकौमुद्याम्) इति ।

ख) **ईदूदेद्-द्विवचनं प्रगृह्यम्** (पा. 1.1.11) – ईच्च ऊच्च एच्च इति समाहारद्वन्द्वः । ईदूदेदिति द्विवचनविशेषणत्वात्तदन्तविधिः । द्विवचनमित्यनेन प्रत्ययत्वेऽपि न तदन्तं गृह्यते । अतएव ईकारादीनां द्विवचनत्वादीदूदेद्रूपं द्विवचनमित्युक्ते प्रगृह्यत्वं भवतीति । यथा – **हरी एतौ** (सिद्धान्तकौमुद्याम्), **विष्णू इमौ** (सिद्धान्तकौमुद्याम्), **गङ्गे अमू** (सिद्धान्तकौमुद्याम्), **पचेते इमौ** (सिद्धान्तकौमुद्याम्) इत्यादि ।

ग) **अदसो मात्** (पा. 1.1.12) – अदस्-शब्दस्य षष्ठ्यैकवचने अदसः इति । अदश्शब्दावयवात् मकारादित्यर्थः । अदश्शब्दे मकारात् परस्य ई-कारस्य ऊकारस्य च प्रगृह्यसंज्ञा भवति । यथा – **अमी ईशाः** (सिद्धान्तकौमुद्याम्), **रामकृष्णावमू आसाते** (सिद्धान्तकौमुद्याम्) इत्यादि ।

घ) **शे** (पा. 1.1.13) – अस्मभ्यमित्यर्थः ***सुपां सुलुक्...*** [45] इति भ्यसः शे आदेशः । शे-इत्यस्य ए-कारः प्रगृह्यः स्यात् । यथा – **अस्मे इन्द्राबृहस्पती** (सिद्धान्तकौमुद्याम्) ।

ङ) **निपात एकाजनाङ्** (पा. 1.1.14) – आङ्वर्जः एकोऽच् निपातः प्रगृह्यसंज्ञकः स्यात् । यथा – इ विस्मये, **इ इन्द्रः** (सिद्धान्तकौमुद्याम्) । उ वितर्के, **उ रमेश** (सिद्धान्तकौमुद्याम्) । अनाङ् आकारोऽपि प्रगृह्यो भवति । यथा – **आ एवं नु मन्यसे** (सिद्धान्तकौमुद्याम्) इति ।

च) **ओत्** (पा. 1.1.15) – ओदन्तो निपातः प्रगृह्यः स्यात् । यथा – **अहो ईशाः** (सिद्धान्तकौमुद्याम्) ।

छ) **सम्बुद्धौ शाकल्यस्येतावनार्षे** (पा. 1.1.16) – सम्बुद्धनिमित्तक ओकारो वा प्रगृह्यऽवैदिक इतौ परे । यथा – **विष्णो इह** (सिद्धान्तकौमुद्याम्) इति ।

ज) **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (6.1.127)** – असवर्णे परे सति पदान्तानां इ-उ-ऋ-ऌ-काराणां ह्रस्वो भवति, विकल्पे सन्धिर्न भवति । यथा – **चक्री + अत्र - चक्रि अत्र – चक्र्यत्र** (सिद्धान्तकौमुद्याम्) ।

झ) **ऋत्यकः (पा. 6.1.128)** – ऋ-कारे परे सति पदान्तानां इ-उ-ऋ-ऌ-काराणां ह्रस्वो भवति, विकल्पे सन्धिर्न भवति । यथा – **ब्रह्मा +ऋषिः – ब्रह्म ऋषिः, ब्रह्मर्षिः** (सिद्धान्तकौमुद्याम्) । जन्म +ऋतुः – जन्म ऋतुः, जन्मर्तुः । सप्त +ऋषीणाम् – सप्त ऋषीणाम्, सप्तर्षीणाम् इत्यादि ।

एतावदेव अष्टाध्याय्यां प्रकृतिभावः । इदानीं व्यञ्जनसन्धिः –

## अष्टाध्याय्यां हल्सन्धिः तथा व्यञ्जनसन्धिः

अष्टाध्याय्यां व्यञ्जनसन्धिविषयकानि अष्टत्रिंशत्संख्यकानि (38) सूत्राणि सन्ति । तेषु कतिपय एव -

**झलां जशोऽन्ते,**[46] **स्तोः श्चुना श्चुः,**[47] **ष्टुना ष्टुः,**[48] **यरोऽनुनासिकेऽनुनासिको वा,**[49] **अनुस्वारस्य ययि परसवर्णः,**[50] **वा**

[45] पा. – (सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः)
[46] पा. – 8.4.39
[47] पा. – 8.4.40

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**पदान्तस्य**,[51] **तोर्लि**,[52] **उदः स्थास्तम्भोः पूर्वस्य**,[53] **झयो होऽन्यतरस्याम्**,[54] **शश्छोऽटि**,[55] **मोऽनुस्वारः**,[56] **ङमो ह्रस्वादचि ङमुण् नित्यम्**,[57] **नश्छव्यप्रशान्** [58] इत्यादि।

क) **<u>झलां जशोऽन्ते</u>** (पा. 8.4.39) – पदान्तस्थिते झल्-स्थाने स्थानसाम्यानुसारेण जश्-स्यात्। यथा – वाक् ईशः - **वागीशः** (सिद्धान्तकौमुद्याम्), चित् रूपम् - **चिद्रूपम्** (सिद्धान्तकौमुद्याम्), दिक् अन्तः - दिगन्तः, वाक् इन्द्रियम् - वागिन्द्रम्, सम्यक् एव - सम्यगेव, त्वक् आसनम् - त्वगासनम् इत्यादि।

ख) **<u>स्तोः श्चुना श्चुः</u>** (पा. 8.4.40) – सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। यथा – हरिस् शेते - **हरिश्शेते** (सिद्धान्तकौमुद्याम्), रामस् चिनोति - **रामश्चिनोति** (सिद्धान्तकौमुद्याम्), सत् चित् -**सच्चित्** (सिद्धान्तकौमुद्याम्), शार्ङ्गिन् जय - **शार्ङ्गिञ्जय** (सिद्धान्तकौमुद्याम्) इत्यादि।

ग) **<u>ष्टुना ष्टुः</u>** (पा. 8.4.41) – स्तोः ष्टुना योगे ष्टुः स्यात्। यथा – रामस् षष्ठ **रामष्षष्ठः** (सिद्धान्तकौमुद्याम्), रामस् टीकते - **रामष्टीकते** (सिद्धान्तकौमुद्याम्), तद् टीका - **तट्टीका** (सिद्धान्तकौमुद्याम्), चक्रिन् ढौकसे - **चक्रिण्ढौकसे** (सिद्धान्तकौमुद्याम्) इत्यादि।

घ) **<u>यरोऽनुनासिकेऽनुनासिको</u>** वा (पा. 8.4.45) – यरः पदान्तस्यानुनासिके परेऽनुनासिको स्यात्। विकल्पे जश् स्यात्। यथा – एतत् मुरारिः – **एतद् मुरारिः**, **एतन्मुरारिः** (सिद्धान्तकौमुद्याम्), प्राक् मुखः – प्राङ्मुखः प्राग्मुखः, दिक् नागः – दिङ् नागः, दिग् नागः इत्यादि।

ङ) **<u>अनुस्वारस्य ययि परसवर्णः</u>** (पा. 8.4.58) – श् ष् स् ह् भिन्ने व्यञ्जनवर्णे परे स्थिते सति अनुस्वारस्य स्थाने परवर्तिनो वर्गस्य पञ्चमवर्णः स्यात्। यथा – अन् कितः - **अङ्कितः** (सिद्धान्तकौमुद्याम्), अन् चितः - **अञ्चितः** (सिद्धान्तकौमुद्याम्), कुन् ठितः - **कुण्ठितः** (सिद्धान्तकौमुद्याम्), शाम् त - **शान्तः** (सिद्धान्तकौमुद्याम्), गुम् फितः - **गुम्फितः** (सिद्धान्तकौमुद्याम्) इत्यादि।

च) **वा पदान्तस्य** (पा. 8.4.59) – पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। यथा – **त्वङ्करोषि** - **त्वं करोषि** (सिद्धान्तकौमुद्याम्), **सय्यँन्ता संयन्ता** (सिद्धान्तकौमुद्याम्), **सव्वँत्सरः संवत्सरः** (सिद्धान्तकौमुद्याम्), **यल्लोँकम् यं लोकम्** (सिद्धान्तकौमुद्याम्) इत्यादि।

---

[48] पा. – 8.4.41
[49] पा. – 8.4.45
[50] पा. – 8.4.58
[51] पा. – 8.4.59
[52] पा. – 8.4.60
[53] पा. – 8.4.61
[54] पा. – 8.4.62
[55] पा. – 8.4.63
[56] पा. – 8.3.23
[57] पा. – 8.3.32
[58] पा. – 8.3.7

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

एतावदेव अष्टाध्याय्यां व्यञ्जनसन्धिः तथा हल्सन्धिः। इदानीं विसर्गसन्धिः –

## अष्टाध्याय्यां विसर्गसन्धिः

अष्टाध्याय्यां विसर्गसन्धिविषयकानि एकादशसंख्यकानि (11) सूत्राणि सन्ति। तेषु कतिपय एव –

**विसर्जनीयस्य सः**,[59] **वा शरि**,[60] **कुप्वोः (जिह्वामूलीय) क (उपध्मानीय) पौ च**,[61] **नमस्पुरसोर्गत्योः**,[62] **अतः कृकमिकंसकुम्भ पात्रकुशाकर्णीष्वनव्ययस्य**,[63] **अधश्शिरसी पदे** [64] इत्यादि। **स्तोः श्चुना श्चुः**,[65] **ष्टुना ष्टुः**[66] - इति सूत्रद्वयमपि विसर्गसन्धौ अन्तर्गतं भवतीति। यथा –

**स्तोः श्चुना श्चुः** - हरिः शेते - **हरिश्शेते** (सिद्धान्तकौमुद्याम्), रामः चिनोति – रामश्चिनोति, पूर्णः चन्द्रः – पूर्णश्चन्द्रः इत्यादि।
**ष्टुना ष्टुः -** रामस् टीकते **रामष्टीकते** (सिद्धान्तकौमुद्याम्), धनुः टङ्कारः – धनुष्टङ्कारः, भग्नः ठक्कुरः – भग्नष्ठक्कुरः इत्यादि।

क) **विसर्जनीयस्य सः** (पा. 8.3.34) – वर्गस्य प्रथम-द्वितीय-वर्णे परे स्थिते सति श्-ष्-स्-परे स्थिते सति च विसर्गस्य स्थाने स्-भवति। यखा – विष्णुः त्राता – **विष्णुस्त्राता** (सिद्धान्तकौमुद्याम्), सरः तीरम् – सरस्तीरम् इत्यादि।

ख) **वा शरि** (पा. 8.3.36) – शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। यथा – **हरिः शेते, हरिश्शेते**।

ग) **कुप्वोः (जिह्वामूलीय) क (उपध्मानीय) पौ च** (पा. 8.3.37) – क-वर्गे प-वर्गे परे स्थिते च विसर्गस्थाने यथाक्रमं जिह्वामूलीयः कः, उपध्मानीयः पः च भवति विकल्पे। अन्यथा विसर्गस्थाने विसर्गो भवति। यथा – कः करोति – **क (जिह्वामूलीय-क)करोति**, **कः करोति** (सिद्धान्तकौमुद्याम्), कः खनति – **क (जिह्वामूलीय-ख)खनोति**, **कः खनोति** (सिद्धान्तकौमुद्याम्), कः पचति – **क (उपध्मानीय-प)पचति**, **कः पचति** (सिद्धान्तकौमुद्याम्), कः फलति – **क (उपध्मानीय-फ)फलति**, **कः फलति** (सिद्धान्तकौमुद्याम्) इत्यादि।

घ) **नमस्पुरसोर्गत्योः** (पा. 8.3.40) – क-वर्गे प-वर्गे च परे स्थिते सति गति-संज्ञयोः नमस्-पुरस्-शब्दयोः विसर्गस्य स्-भवति। यथा – नमः करोति – **नमस्करोति** (सिद्धान्तकौमुद्याम्), नमः कृत्य – नमस्कृत्य इत्यादि।

ङ) **अतः कृकमिकंसकुम्भ पात्रकुशाकर्णीष्वनव्ययस्य** (पा. 8.3.46) – अकारादुत्तरस्य अनव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात् करोत्यादिषु परेषु। न तूत्तरपदस्थस्य इति। यथा – अयः कारः – **अयस्कारः** (सिद्धान्तकौमुद्याम्), अयः कामः – **अयस्कामः** (सिद्धान्तकौमुद्याम्), अयः कंसः – **अयस्कंसः** (सिद्धान्तकौमुद्याम्), अयः पात्रम् – अयस्पात्रम् (सिद्धान्तकौमुद्याम्), यशः करः – यशस्करः इत्यादि।

---

[59] पा. – 8.3.34
[60] पा. – 8.3.36
[61] पा. – 8.3.37
[62] पा. – 8.3.40
[63] पा. – 8.3.46
[64] पा. – 8.3.47
[65] पा. – 8.4.40
[66] पा. – 8.4.41

Vol 8, Issue 11, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.11.8935

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

च) **अधश्शिरसी पदे** (पा. 8.3.47) – अधस्(अधः)-शब्दस्य शिरस्(शिरः)-शब्दस्य विसर्गस्य सादेशः स्यात् पद-शब्दे परे। यथा – अधः पदम् – **अधस्पदम्** (सिद्धान्तकौमुद्याम्), शिरः पदम् – **शिरस्पदम्** (सिद्धान्तकौमुद्याम्) इत्यादि। एतावदेव कतिपयैः सूत्रैः अष्टाध्याय्यां विहितो विसर्गसन्धिः। अत्र, पाणिनिव्याकरणे विहिताः त्रयः सन्धयः समुल्लिखिताः। इदानीम् अग्निपुराणस्य सन्धिविमर्शः –

## अग्निपुराणे सन्धिः

अग्निपुराणस्य पञ्चाशदधिक-त्रिशततमेऽध्याये (350) सन्धिः विहितः। *नामकुर्यान्नाटकस्य गर्भितार्थप्रकाशनम्* इति नियमेन अग्निपुराणस्य अध्यायस्यास्य नाम एव *सन्धिसिद्धिस्वरूपकथनम्* इति।

पुराणेऽस्मिन् सन्धेः वर्णानात् प्राक् स्कन्ध उवाच – ***वक्ष्ये सन्धिसिद्धरूपस्वरसन्धिमथादितः***[67] इति। अत्र स्वर-व्यञ्जन-विसर्ग-इति त्रिविधाः सन्धयः तथा सन्धिसिद्धिरूपाणि समुल्लिखितानि। अर्थात् त्रयाणां सन्धीनाम् केवलम् उदाहरणाणि तत्र प्रदत्तानि। तद्यथा -

**स्वरसन्धे उदाहरणानि**[68] – **दण्डाग्रम्, सागता, दधीदम्, नदीहते, मधूदकम्, पितॄषभः, ऌकारः, तवेदम्, सकलोदकम्, अर्धर्चोऽयम्, तवल्कारः, सैषा, सैन्द्री, तवौदनम्, खट्वौघः, इत्येवम्, व्यसुधी, वस्वलंकृतः, पित्रर्थोपवनम्, दात्री, नायकः, लावकः, नयः, त इह, तयिह, तेऽत्र, योऽत्र, जलेऽकजम्** इत्यादि।

**स्वरसन्धौ प्रकृतिभावः**[69] – **नो अहो, एहि, अ अवेहि, इ इन्द्रकम्, उ उत्तिष्ठ, कवी एतौ, वायु एतौ, वने इमे, अमी एते, यज्ञभूते एहि देव इमं नय** इत्यादि।

**स्वरवर्णादनन्तरं व्यञ्जनसन्धिः**[70] – उच्यते ***वक्ष्ये सन्धिं व्यञ्जनानां...***[71] इति। यथा – **वाग्यतः, अजेकमातृकः, षडेते, तदिमे, अबादि, वाङ्नीतिः, षण्मुखः, वाङ्मनसम्, वाग्भावादिः, वाक्श्लक्ष्णम्, तच्छरीरकम्, तल्लुनाति, तच्चरेत्, क्रुङ्ङास्ते, सुगण्णिह, भवांश्चरन्, भवांश्छात्रः, भवांष्टीका, भवांष्ठकः, भवांस्तीर्थम्, भवांस्थेत्याह, भवाँल्लेखा, भवाञ्जयः, भवाञ्छेते, भवाञ्च्शेते, भवाञ्शेते, भवाण्ढीनः, त्वम्भर्त्ता, त्वङ्करिष्यसि** इत्यादि।

**व्यञ्जनसन्धेरनन्तरं विसर्गसन्धिः**[72] – उच्यते ... ***सन्धिर्ज्ञेयो विसर्गतः***[73] इति। उदाहरणानि यथा – **कश्छिन्द्यात्, कश्चरेत्, कष्टः, कष्ठः, कः स्थः, कश्चलेत्, क (जिह्वामूलीय-ख)खनेत्, क(जिह्वामूलीय-क)करोति, क (उपध्मानीय-प)पठेत्, क (उपध्मानीय-फ)फलेत्। कश्श्वशुरः, कः श्वशुरः। कस्स्वरः, कः स्वरः। कः फलेत्, कः शयिता, कोऽत्रयोधः, क उत्तमः, देवाएते, भो इह, स्वदेवा यान्ति, भगो व्रज, सु पूः, सुदूरात्रित्र, वायुर्याति, पुनर्नहि, पुना राति, स यातीह, सैष याति, क ईश्वरः, ज्योतीरूपम्** इत्यादि।

[67] अग्नि. – 350.1क

[68] अग्नि. – 350.1-5

[69] अग्नि. – 350.4ख-5

[70] अग्नि. – 350.6क-9ख

[71] अग्नि. – 350.6क

[72] अग्नि. – 350.9ख-13

[73] अग्नि. – 350.9ख

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

अन्ते पुनः **व्यञ्जनसन्धेः त्रीणि उदाहरणानि** प्रदत्तानि सन्ति तत्रभवता ग्रन्थकारेण। तद्यथा – **तवच्छत्रम्, म्लेच्छ धीः, छिद्रमांच्छिदत्** [74] इति।

अग्निपुराणे उदाहरणानामेतेषां सूत्राणि न उल्लिखितानि सन्ति। इदानीं ससूत्रैः तेषां पुनरुल्लेखनं समुपस्थाप्यते –

**स्वरसन्धिः** -

**दण्डाग्रम्, सागता, दधीदम्, नदीहते, मधूदकम्, पितृषभः, ऌकारः, तवेदम्, सकलोदकम्, अर्धर्चोऽयम्, तवल्कारः, सैषा, सैन्द्री, तवौदनम्, खट्वौघः, इत्येवम्, व्यसुधी, वस्वलंकृतः, पित्रर्थोपवनम्, दात्री, नायकः, लावकः, नयः, त इह, तयिह, तेऽत्र, योऽत्र, जलेऽकजम्** इति।

क) **दण्डाग्रम्** (दण्ड अग्रम्), **सागता** (सा आगता), **दधीदम्** (दधि इदम्), **नदीहते** (नदी ईहते) **मधूदकम्** (मधु उदकम्), **पितृषभः** (पितृ ऋषभः), **ऌकारः** (ऌ ऌकारः) – **अकः सवर्णे दीर्घः** (पा. 6.1.101)

ख) **तवेदम्** (तव इदम्), **सकलोदकम्** (सकल उदकम्), **अर्धर्चोऽयम्** (अर्ध ऋचोऽयम्), **तवल्कारः** (तव ऌकारः) – **आद् गुणः** (पा. 6.1.87)

ग) **सैषा** (सा एषा), **सैन्द्री** (सा ऐन्द्री), **तवौदनम्** (तव ओदनम्), **खट्वौघः** (खट्वा औघः) – **वृद्धिरेचि** (पा. 6.1.88)

घ) **इत्येवम्** (इति एवम्), **व्यसुधी** (वि असुधीः), **वस्वलंकृतः** (वसु अलङ्कृतम्), **पित्रर्थोपवनम्** (पितृ अर्थोपवनम्), **दात्री** (दातृ ई) – **इको यणचि** (पा. 6.1.77)

ङ) **नायकः** (नै अकः), **लावकः** (लौ अकः), **नयः** (ने अः) – **एचोऽयवायावः** (पा. 6.1.78)

च) **त इह, तयिह – ते इह** – इत्यत्र **एचोऽयवायावः** इति सूत्रेण **त् अय् इह** – इति स्थिते सति **लोपः शाकल्यस्य** इति सूत्रेण य्-इत्यस्य लोपे **त इह**-इति रूपं सिद्धम्। अतएव य्-इत्यस्य अलोपे **तयिह** (**एचोऽयवायावः**), लोपे तु **त इह** (**लोपः शाकल्यस्य,** पा. 8.3.19)।

छ) **तेऽत्र** (ते अत्र), **योऽत्र** (यो अत्र), **जलेऽकजम्** (जले अकजम्) – **एङः पदान्तादति** (पा. 6.1.109)

अग्निपुराणस्य गीताप्रेस-संस्करणे एतेषां स्वरसन्धीनां नामानि यथाक्रमं – क) **दीर्घ-एकादेश-सन्धिः** (पा. अकः सवर्णे दीर्घः) ख) **गुण-एकादेश-सन्धिः** (पा. आद्गुणः) ग) **वृद्धिसन्धिः** (पा. वृद्धिरेचि) घ) **यणादेश-सन्धिः** (पा. इको यणचि) ङ) **अयादेश-सन्धिः** (पा. एचोऽयवायावः) च) **लोपादेश-सन्धिः** (पा. लोपः शाकल्यस्य) छ) **पूर्वरूप-सन्धिः** (पा. एङः पदान्तादति)इति।

इदानीं, **स्वरसन्धौ प्रकृतिभावः** –

**नो अहो, एहि, अ अवेहि, इ इन्द्रकम्, उ उत्तिष्ठ, कवी एतौ, वायु एतौ, वने इमे, अमी एते, यज्ञभूते एहि देव इमं नय** इति।

[74] अग्नि. – 350.13

Vol 8, Issue 11, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.11.8935

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

क) **नो अहो** – **प्लुतप्रगृह्या अचि नित्यम्** (पा. 6.1.125)

ख) **अहो एहि** – **ओत्** (पा. 1.1.15)

ग) **अ अवेहि, इ इन्द्रकम्, उ उत्तिष्ठ** – **निपात एकाजनाङ्** (पा. 1.1.14)

घ) **कवी एतौ, वायु एतौ, वने इमे** – **ईदूदेद्-द्विवचनं प्रगृह्यम्** (पा. 1.1.11)

ङ) **अमी एते** – **अदसो मात्** (पा. 1.1.12)

च) **यज्ञभूते एहि देव इमं नय** – वाक्यं तु एवं भवति – **यज्ञभूते ! एहि, देव ! नय** – उभयत्रैव **प्लुतप्रगृह्या अचि नित्यम्** (पा. 6.1.125)

इदानीं, **व्यञ्जनसन्धिः** –

**वाग्यतः, अजेकमातृकः, षडेते, तदिमे, अबादि, वाङ्नीतिः, षण्मुखः, वाङ्मनसम्, वाग्भावादिः, वाक्श्लक्षणम्, तच्छरीरकम्, तल्लुनाति, तच्चरेत्, क्रुङ्ङास्ते, सुगण्णिह, भवांश्चरन्, भवांश्छात्रः, भवांष्टीका, भवांष्ठकः, भवांस्तीर्थम्, भवांस्थेत्याह, भवाँल्लेखा, भवाञ्जयः, भवाञ्छेते, भवाञ्च्शेते, भवाञ्शेते, भवाण्डीनः, त्वम्भर्त्ता, त्वङ्करिष्यसि** इति।

क) **वाग्यतः** (वाक् यतः), **अजेकमातृकः** (अच् एकमातृकः), **षडेते** (षट् एते), **तदिमे** (तत् इमे), **अबादि** (अप् आदि), **वाग्भावादिः** (वाक् भावादिः) – **झलां जशोऽन्ते** (पा. 8.2.39)

ख) **वाङ्नीतिः** (वाक् नीतिः), **षण्मुखः** (षट् मुखः), **वाङ्मनसम्** (वाक् मनसम्) – **यरोऽनुनासिकेऽनुनासिको वा** (पा. 8.4.45)

ग) **वाक्श्लक्षणम्** (वाक् श्लक्षणम् - वाक्छलक्षणम्), **तच्छरीरकम्** (तत् शरीरकम्) – **शश्छोऽटि** (पा. 8.4.63)

घ) **तल्लुनाति** (तत् लुनाति), **भवाँल्लेखा** (भवान् लेखा, परसवर्णः सानुनासिकः) – **तोर्लि** (पा. 8.4.60)

ङ) **तच्चरेत्** (तत् चरेत्), **भवाञ्जयः** (भवान् जयः) – **स्तोः श्चुना श्चुः** (पा. 8.4.40)

च) **क्रुङ्ङास्ते** (क्रुङ् आस्ते), **सुगण्णिह** (सुगण् इह) – **ङमो ह्रस्वादचि ङमुण् नित्यम्** (पा. 8.3.32)

छ) **भवांश्चरन्** (भवान् चरन्), **भवांश्छात्रः** (भवान् छात्रः), **भवांष्टीका** (भवान् टीका), **भवांष्ठकः** (भवान् ठकः), **भवांस्तीर्थम्** (भवान् तीर्थम्), **भवांस्थेत्याह** (भवान् था इत्याह) – **नश्छव्यप्रशान्** (पा. 8.3.7)

ज) **भवाञ्छेते, भवाञ्च्शेते, भवाञ्शेते** – **भवान् शेते** इति स्थिते **शि तुक्** इति सूत्रेण (पा. 8.3.31) तुगागमः, तुक्-इत्यस्य उगित्, अत एव भवान् त् शेते – भवाञ् च् छेते (**स्तोः श्चुना श्चुः**, पा.8.4.40) इति। **झरो झरि सवर्णे** (पा. 8.4.65) इति सूत्रेण झर्-इत्यस्य लोपे तथा च्-इत्यस्य लोपे **भवाञ्छेते,** लोपः छत्वं च वैकल्पिकमिति कृत्वा **भवाञ्च्शेते**, तुगागमस्यापि वैकल्पिकत्वात् **भवाञ् शेते** इति रूपं भवति।

झ) **भवाण्डीनः** (भवान् डीनः) – **ष्टुना ष्टुः** (पा. 8.4.41)

ञ) **त्वम्भर्त्ता** (त्वम् भर्त्ता), **त्वङ्करिष्यसि** (त्वम् करिष्यसि) – **वा पदान्तस्य** (पा. 8.4.59)

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

अन्ते पुनः **व्यञ्जनसन्धेः त्रीणि उदाहरणानि** प्रदत्तानि सन्ति तत्रभवता ग्रन्थकारेण। तद्यथा – **तवच्छत्रम्, म्लेच्छ धीः, छिद्रमांच्छिदत्** इति।

**तवच्छत्रम्** (तव छत्रम्) – **छे च** (पा. 6.1.73)

**म्लेच्छ धीः, छिद्रमांच्छिदत्** – **दीर्घात्** (पा. 6.1.75), **पदान्ताद्वा** (पा. 6.1.76)

व्यञ्जनसन्धेः बहुभेदाः पाणिनिव्याकरणे समुल्लिखाः। परन्तु अग्निपुराणस्य गीताप्रेस-संस्करणे केवलम् **एकादश-प्रकाराः** निर्दिष्टाः सन्ति। तद्यथा – **जश्त्वविधानम्** (पा. - झलां जशोऽन्ते), **अनुनासिकविधानम्** (पा. - यरोऽनुनासिकेऽनुनासिको वा), **छत्वविधानम्** (पा. - शश्छोऽटि), **श्चुत्वविधानम्** (पा. - स्तोः श्चुना श्चुः), **ष्टुत्वविधानम्** (पा. – ष्टुना ष्टुः), **लकारात्मक-परसवर्णविधानम्** (पा. - तोर्लि), **ङमुडागमविधानम्** (पा. - ङमो ह्रस्वादचि ङमुण् नित्यम्), **नकारसत्वविधानम्** (पा. - नश्छव्यप्रशान्), **परसवर्णविधानम्** (पा. - अनुस्वारस्य ययि परसवर्णः, वा पदान्तस्य), **तुगागमविधानम्** (पा. - शि तुक्, छे च, दीर्घात्, पदान्ताद्वा) इति।

इदानीं, **विसर्गसन्धिः** –

**कश्छिन्द्यात्, कश्चरेत्, कष्टः, कष्ठः, कः स्थः, कश्चलेत्, क (जिह्वामूलीय-ख)खनेत्, क(जिह्वामूलीय-क)करोति, क (उपध्मानीय-प)पठेत्, क (उपध्मानीय-फ)फलेत्। कश्श्वशुरः, कः श्वशुरः। कस्स्वरः, कः स्वरः। कः फलेत्, कः शयिता, कोऽत्रयोधः, क उत्तमः, देवाएते, भो इह, स्वदेवा यान्ति, भगो व्रज, सु पूः, सुदूरात्रिरत्र, वायुर्याति, पुनर्नहि, पुना राति, स यातीह, सैष याति, क ईश्वरः, ज्योतीरूपम्।**

- क) **कश्छिन्द्यात्** (कः छिन्द्यात्), **कश्चरेत्** (कः चरेत्), **कश्चलेत्** (कः चलेत्) – **विसर्जनीयस्य सः** (पा. 8.3.34)
- ख) **कष्टः** (कः टः), **कष्ठः** (कः ठः) – **विसर्गनीयस्य सः** (पा. 8.3.34), **ष्टुना ष्टुः** (पा. 8.4.41)
- ग) **कः स्थः** (कः स्थः कस्स्थः) – **वा शरि** (पा. 8.3.36)
- घ) **क (जिह्वामूलीय-ख)खनेत्, क(जिह्वामूलीय-क)करोति, क (उपध्मानीय-प)पठेत्, क (उपध्मानीय-फ)फलेत्** - **कुप्वोः (जिह्वामूलीय) क (उपध्मानीय) पौ च** (पा. 8.3.37)
- ङ) **कश्श्वशुरः, कः श्वशुरः। कस्स्वरः, कः स्वरः।** – **वा शरि** (पा. 8.3.36)
- च) **कः फलेत्, कः शयिता** – **वा शरि** (पा. 8.3.36)
- छ) **कोऽत्रयोधः** – **अतो रोरप्लुतादप्लुते** (पा. 6.1.113)
- ज) **क उत्तमः, देवाएते, भो इह** – **भोभगोअघोअपूर्वस्य योऽशि** (पा. 6.1.113), **लोपः शाकल्यस्य** (पा. 8.3.19)
- झ) **स्वदेवा यान्ति** – **विसर्जनीयस्य सः** (पा. 8.3.34), **लोपः शाकल्यस्य** (पा. 8.3.19)
- ञ) **भगो व्रज** – **अतो रोरप्लुतादप्लुते** (पा. 6.1.113), **हलि सर्वेषाम्** (पा. 8.3.22)
- ट) **सु पूः** (सुपूर्) – **खरवसानयोर्विसर्जनीयः** (पा. 8.3.15)
- ठ) **सुदूरात्रिरत्र** (सुदूर् रात्रिरत्र), **पुना राति** (पुनर् राति) – **रोरि** (पा. 8.3.14)
- ड) **वायुर्याति** (वायुस् याति) – **ससजुषो रुः** (पा. 8.2.66), **खरवसानयोर्विसर्जनीयः** (पा. 8.3.15)

IJAMSR
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

ढ) **स यातीह** (सस् याति इह) – **एतत्तदोः सुलोपो** (पा. 6.1.132)

ण) **सैष याति** (सस् एषस् याति) – सस्- शब्दस्य स्-इत्यस्य लोपः पादपूरणार्थम्, एषस्-शब्दस्य स्-इत्यस्य लोपः - **एतत्तदोः सुलोपो** (पा. 6.1.132)

त) **क ईश्वरः** (कस् ईश्वरः) – कस्- शब्दस्य स्-इत्यस्य लोपः पादपूरणार्थम्

थ) **ज्योतीरूपम्** (ज्योतिर् रूपम्) – **रोरि** (पा. 8.3.14), **ढ्रलोपे पूर्वस्य दीर्घोऽणः** (6.3.111)

विसर्गसन्धेः बहुभेदाः पाणिनिव्याकरणे समुल्लिखाः। परन्तु अग्निपुराणस्य गीताप्रेस-संस्करणे केवलम् **दश-प्रकाराः** निर्दिष्टाः सन्ति। तद्यथा – **विसर्गस्थाने सत्वविधानम्** (पा. विसर्जनीयस्य सः), **वैकल्पिकविसर्गत्वविधानम्** (पा. वा शरि), **जिह्वामूलीय-क - उपध्मानीय-प –विधानम्** (पा. कुप्वोः (जिह्वामूलीय) क (उपध्मानीय) पौ च), **रुत्वविधानम्** (पा. ससजुषोः रुः), **रोरुत्वविधानम्** (पा. अतो रोरप्लुतादप्लुते, हशि च), **रौर्यत्वविधानम्** (पा. अतो रोरप्लुतादप्लुते, भोभगोअघोअपूर्वस्य योऽशि), **यलोपविधानम्** (पा. हलि सर्वेषाम्), **रकार-विसर्गविधानम्** (पा. खरवसानयोर्विसर्जनीयः), **सुलोपविधानम्** (पा. एतत्तदोः सुलोपोऽकोरनञ् समासे हलि, सोऽचि लोपे चेत्पादपूरणम्), **ढ्रलोपदीर्घविधानम्** (पा. रोरि, ढो ढे लोपः, ढ्रलोपे पूर्वस्य दीर्घोऽणः) इति।

एतावदेव पाणिनीयव्याकरणे अष्टाध्याय्यां च सन्धिविमर्शः।

**उपसंहारः** –

सुदीर्घकालात् विदुषां मध्ये भणतिरियं सुप्रसिद्धा वाणी यत् – *काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्* इति। सत्सु अपि अन्येषु व्याकरणेषु पाणिनीयव्याकरणस्य तथा अष्टाध्यायी-ग्रन्थस्यैव कथमियती चर्चा विद्यते। कथमेतज्जातं व्याकरणं लोकप्रियम्। यद्यपि देवताप्रसादात् अन्यानि व्याकरणानि सम्प्राप्तानि सन्ति, तथापि पाणिनीयव्याकरणमिदं सम्पूर्णे प्राच्ये प्रतीच्ये च लब्धप्रतिष्ठितमिति विद्यते। माहेश्वराणि चतुर्दशपरिमितानि सूत्राणि[75] आदाय विरचितमिदं व्याकरणं प्राक्तनीं विज्ञानसरणीं प्रदर्शयति। व्याकरणगतेषु प्रताहार-सन्धि-शब्दरूप-कारकादीन् अवलम्ब्य प्रायः षन्नवत्युत्तर-नवसहस्राधिक-त्रिसहस्रपरिमितानि (3996) सूत्राणि विरचितानि सन्ति। प्रसङ्गेऽस्मिन् उच्यते (एवं श्रूयते) – ***त्रीणिसूत्र-सहस्राणि तथा नवशतानि च। षण्णवतिञ्च सूत्राणां पाणिनिः कृतवान् स्वयम्॥*** इति।

इदानीम् अस्माकमस्य गवेषणापत्रस्य नाम एव **अग्निपुराणे वर्णिताः सन्धिनियमाः : पाणिनीयदृष्ट्या परीक्षणम्** इति। उभयग्रन्थस्य सन्धिविषये आलोचना उपरि यथामति कृता। **सन्धिविषये** आलोचना अग्निपुराणस्यास्य पञ्चदशाधिकत्रिशततमेऽध्याये (350) समुपलभ्यते। उपर्युक्तालोचनातः एतदेवावगम्यते यत् पाणिनीयसन्धिवत् सन्धिस्तत्रापि त्रिविधः – स्वरसन्धिः, व्यञ्जनसन्धिः, विसर्गसन्धिश्चेति। परन्तु तत्र सन्धेः किमपि लक्षणं तथा सूत्रं नास्ति। त्रिविधानां सन्धीनां बहूनि उदाहरणानि पुराणेऽस्मिन् प्रदत्तानि। परन्तु अष्टाध्यायां सन्धिसूत्रमस्ति, सन्धेर्नियमोऽस्ति, सूत्रसहयोगेन उदाहरणानि अपि सन्ति। अतएव पुराणस्यास्य सन्धिविषयकानि उदाहरणान्यालोच्य तदुदाहरणस्थाने अष्टाध्याय्याः सन्धिसूत्राणि कानि भवन्तीति गवेषणापत्रेऽस्मिन् समुल्लिख्यन्ते अस्माभिः। अत एव मन्यते खलु,

[75] अ इ उ ण्, ऋ ऌ क्, ए ओ ङ्, ऐ औ च्, ह य व र ट्, ल ण्, ञ म ङ ण न म्, झ भ ञ्, घ ढ ध ष्, ज ब ग ड द श्, ख फ छ ठ थ च ट त व्, क प य्, श ष स र्, ह ल्

IJAMSR
**International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

गवेषणापत्रेणानेन ख्रीष्टपूर्वकालगतेन *अष्टाध्यायी*-इति व्याकरणग्रन्थेन सह ख्रीष्टपरवर्तिकालीकस्य अग्निपुराणविलसितस्य सन्धिविषयस्य या तुलनात्मका समीक्षा मया कृता तया खलु परवर्तिकालिनः शोधछात्राः, पाठकाश्च सविशेषमुपकृताः भवन्तीति शम् ॥

**शब्दसंक्षेपः** –

**अग्नि**. – अग्निपुराणम्, **ऋक्प्रा**. – ऋक्प्रातिशाख्यम्, **देवी**. – देवीपुराणम्, **नि.** – निरुक्तम्, **पा.** – पाणिनिः, **पा.शि.** – पाणिनीयशिक्षा, **बाल**. – बालमनोरमा, **मनु**. – मनुसंहिता, **वा.** – वार्त्तिकम्

**ग्रन्थविवरणपञ्जी** –

*अग्निपुराण* (मूल संस्कृतका हिन्दी-अनुवाद)। गोरखपुर : गीताप्रेस, 2073 संवत्।

*अग्निपुराणम्* (हिन्दी अनुवाद सहित) । पूर्वभाग-उत्तरभागसहितम् । सम्पादकौ : तारिणीश झा, घनश्याम- त्रिपाठी । एलाहावाद : हिन्दी साहित्य सम्मेलन, प्रयाग, 2007.

*अग्निपुराणम्* (महर्षि-श्रीकृष्णद्वैपायन-वेदव्यास-विरचितम्) (वङ्गानुवादसमेतम्) । सम्पा. – पञ्चानन-तर्करत्नः । परिशोधकः – श्रीजीव-न्यायतीर्थः। कलिकाता : नवभारत पावलिशार्स, 1389 वङ्गाब्दः।

अग्निपुराणम् (हिन्दीव्याख्योपेतम्)। व्याख्याकारः : शिवप्रसाद-द्विवेदी। व्रजजीवन प्राच्यभारती ग्रन्थमाला 106. दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 2004.

*अष्टाध्यायी*। चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता। महर्षि-पाणिनिः । व्याख्याकारः - ईश्वरचन्द्रः । प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०३, दिल्ली : चोखम्बा संस्कृत प्रतिष्ठान, २००४.

*अष्टाध्यायीसूत्रपाठः* । संशोधनकर्ता – सि. शङ्कररामशर्मा। श्रीबालमनोरमा सीरीज् नं 2, द्वितीय-संस्करणम्, मद्रास : मैलापुर, 1937.

*अष्टाध्यायी* (सूत्राणां पदच्छेद-अनुवाद-उदाहरणसूची-सूत्रसूची-गणपाठ-सहितम्) । सम्पा. – तपनशङ्कर-भट्टाचार्यः । कोलकाता : संस्कृत वुक डिपो, प्रथमसंस्करणम्, 2004.

*देववाणीतत्त्वबोधिनी* (संस्कृत-व्याकरणम्) । श्रीवरदाराजाचार्यकृतलघुकौमुदीस्थसंज्ञासन्धिसमासकृदन्त-तद्धितस्त्रीप्रत्ययतिङन्तण्यन्तादिप्रकरणैः सहितं तथा श्रीभट्टोजिदीक्षितकृत-सिद्धान्तकौमुदीस्थकारकप्रकरणं-सरलहिन्दीव्याख्यासहितम्। व्याख्याकारः : अविनाशः कृष्णः। दिल्ली : मोतीलाल बनारसीदास, 2023.

*पाणिनिर अष्टाध्यायी* (वङ्गभाषया)। *प्रभा*-टीका द्वारा सनाथीकृत। सम्पा. – देवेन्द्रकुमार-विद्यारत्न। कोलकाता : वलराम प्रकाशनी, पुनर्मुद्रितसंस्करण, 2003.

*पाणिनीय शब्दशास्त्र* (वङ्गभाषया) । भट्टोजिदीक्षित-विरचित सिद्धान्तकैमुदी अनुसारे विन्यस्त अष्टाध्यायी-सूत्रसमूहेर आलोचनात्मक संस्कृत व्याकरण । सत्यनारायण चक्रवर्ती । कोलकाता : संस्कृत पुस्तक भाण्डार, पुनर्मुद्रितसंस्करण, 2013. प्रथमप्रकाश 2003.

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

*वैयाकरणसिद्धान्तकौमुदी* । सम्पा. – रामचन्द्र झा । व्याख्याकारः – सत्यनारायण शास्त्री खण्डुडी । इन्दु*मती* संस्कृत-हिन्दीव्याख्या-विविधपरिशिष्ट दिप्पणी (नोटस्) सहिता (ण्यन्तादि-समाप्त्यन्तो भागः) । कृष्णदास संस्कृत सीरीज् 13, प्रथमभागतः चतुर्थभागपर्यन्तम् । वाराणसी : कृष्णदास अकादेमी, प्रथम-द्वितीय-भागौ, 2001; तृतीय-चतुर्थ-भागौ, 2002.

*वैयाकरणसिद्धान्तकौमुदी*, वासुदेवदीक्षितप्रणीतया बालमनोरमाख्यव्याख्यया, ज्ञानेन्द्रसरस्वतीविरचितया तत्त्वबोधिन्याख्यव्याख्यया सह । सम्पादकौ – गिरिधरशर्मा, परमेश्वरानन्दशर्मा । प्रथमतः चतुर्थभागं यावत् । दिल्ली : मोतीलाल बनारसीदास, पुनर्मुद्रितसंस्करणम्, 1998 (प्रथमभागः), 1997 (द्वितीयभागः, तृतीयभागः, चतुर्थभागश्च) ।

*New Vārttikas to Pāṇini's Grammar* (*पाणिनीय-व्याकरणेऽभिनव-वार्त्तिकानि*) (A Specimen). Vishva Bandhu and Munishwar Deo. Gen. ed. Visha Bandhu. Vishveshvaranand Institute Publication 583. Vishveshvaranand Indological Series 57. Hoshiarpur: Vishveshvaranand Institute of Sanskrit and Indological Studies, Punjab University, 1972.

*Vyākaraṇ Darśaner Itihās* (An Historical Study of Sanskrit Grammatical Literature in all its Philosophical bearings from critical and comparative points of view). Gurupada Haldar. Kolkata: Sanskrit Book Depot, rpt. 2006, 1st ed. 1350 BS.

~~~~~~~~~~~~~~~~~~~~~~~~~
~~~~~~~~~~~~~~~~~~~~~~~~~